'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 3rd Semester Examination, 2023

## CC5-SANSKRIT (305)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

### विभाग-क

1. संस्कृतभाषया देवनागरीलिप्या च ***एकस्योत्तरं*** प्रदेयम्। 12×1 = 12

(क) श्रीमद्भगवद्गीतानुसारेण योगादिकर्मणाम् आवश्यकता प्रतिपाद्यताम्।

(ख) श्रीमद्भगवद्गीतायाः तृतीयाध्यायमवलम्ब्य जगच्चक्रं विवृणुत।

2. संस्कृतेन ***एकस्य*** व्याख्या कार्या। 6×1 = 6

(क) श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥

(ख) न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥

3. बङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। (***द्वयोः***) 3×2 = 6

(क) अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवन्ति पर्जन्यो यज्ञः कर्मसमुद्भवः।

(ख) मयि सर्वाणि कर्माणि सन्नस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥

(ग) कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसास्मरन्।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते॥

4. संस्कृतेन ***द्वयोः*** संक्षिप्तोत्तरं प्रदेयम्। 3×2 = 6

(क) ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन— वक्ता कः ? अत्र ज्यायसी इति शब्दस्यार्थः कः ?

(ख) गीतायां कति अध्यायाः सन्ति ? तत्र तृतीयाध्यायस्य नाम किम् ?

(ग) पापं के भक्षन्ति ?

## विभाग-ख

5. ***प्रश्नमेकं*** समाधत्त — 12×1 = 12

(क) 'उपनिषद्' इति शब्दस्य कोऽर्थः ? बृहदारण्यकोपनिषदम् आधारीकृत्य जनकमैत्रेयीसम्बादं संक्षेपेन आलोचयत।

(ख) बृहदारण्यकोपनिषदाधारेण जीवात्मन उत्क्रमणविषयम् आलोचयत।

6. संस्कृतेन ***एकस्य*** व्याख्या कार्या। 6×1 = 6

(क) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः॥

(ख) येनाहं नामृता स्यां किमहं तेन कुर्याम्।

7. ***द्वयोः*** अनुवादः कार्यः। 3×2 = 6

(क) अणुः पन्था विततः पुराणो
मां स्पृष्टोऽनुवित्तो मयैव।
तेन धीरा अपियन्ति ब्रह्मविदः
स्वर्गं लोकमित ऊर्ध्वं विभुक्ताः॥

(ख) विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥

(ग) तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।
नानुध्यायाद् बहूञ्छब्दान् वाचो विग्लापनं हि तदिति॥

8. संस्कृतेन ***द्वयोः*** संक्षिप्तोत्तरं प्रदेयम्। 3×2 = 6

(क) आत्मज्ञानं विना का दुर्गतिः ?

(ख) बृहदारण्यकोपनिषदि कति काण्डाः सन्ति ? तेषां नामानि लिखत।

(ग) बृहदारण्यकोपनिषद् कस्य वेदस्य अन्तर्गता ? तस्मिन् वेदे अन्तर्गतानाम् उपनिषदां नामानि लिखत।

——×——